# दुर्गावती

**श्री सूर्यनारायण शर्मा**
व्याकरणा चार्य : , न्यायशास्त्री

एषा बुन्देलखण्डस्य पुरातन्या मोहबानाम्न्या राजधान्या अधिपतेः सुताऽभवत्। अस्याः सौन्दर्यं शौर्यं चेति द्वयमपि प्रशस्यतममासीदिति वर्णयन्ति पुराविदः । अस्या गुणस्तुतिं निशम्य गढमण्डलाधिपतिर्दलपतशाहो मोहब्बाधिपतेः समीपे तां तेन सह विवाहयितुं संदेशं प्राहिणोत्। परं मोहबाधिपतिश्चन्देलो गढमण्डलाधिपतिं कुलगौरवेण स्वसमानममन्यमानः स्वतनुजां दुर्गावतीं तस्मै दातुं नाभ्यनन्दत्। परं स्पष्टमनङ्गीकारोऽनुचित इति विचार्य तं प्रतारयितुमिच्छुःसः "यदि दलपतिशाहो मम तनुजया सह यातुं पञ्चाशतंसहस्राणि सैन्यमानयेत् तर्ह्यं हंतां तस्मै दद्याम्" इति प्रतिसंदेशं प्राहिणोत्।

अस्मिन् संदेशे मोहब्बाधिपतेरयमभिप्रायोऽभवद्यन्नैव स तावत्सैन्यमानेतुमशक्ष्यत्, नाऽपि च स तस्मै स्वां कन्यामदास्यत्, इति। परं तस्मिन् समये गढमण्डलराज्यमप्यतिविस्तीर्णमभवत्। तस्यायामः पञ्चाशदधिकैकशतं विस्तारश्च पञ्चाशतं क्रोशानासीत्। तथा च दलपतिशाहस्तावतैव बलेन सह राजकुमारीं परिणेतु गतः। चन्देलोऽपि च यथाप्रतिज्ञ तस्मै स्वसुतां ददौ।

दुर्गावती स्वस्वामिना दलपतिशाहेन सह चिरं भोगान् बुभुजे। केषुचिच्च वर्षेषु तस्या एकः पुत्रोऽभवद्यस्य वीरवल्लभ इति नाम कृतम्। वीरवल्लभस्य पञ्चदशवर्षावस्थायां दलपतिः स्वर्ग

मारूढो दुर्गावती च स्वामिवियौगेन नितान्तमतप्यत्। परं स्वपुत्रस्य बालत्वाद् राष्ट्रविप्लवं शङ्कमाना सा सकलमपि प्रबन्धं स्वहस्तगतमेवाकरोत् । तस्याःसुशासनवशात्सर्वा अपि प्रकृतयस्तस्यामन्वरज्यन्त । राज्यं चोत्तरोत्तरमुपचयं प्राप।

दुर्गावत्याः शासनकाले देहलीसिंहासनं परमप्रतापिनाऽकबरेणाध्यरुह्यत। स च सर्वमपि भारतं तदधीनं कर्तु मै-च्छत्। गढमण्डलं स्वतन्त्रं राज्यमभवत्तस्मिँश्च सप्ततिर्ग्रामास्तादृशा अभवन् ये तत्कालपर्यन्तं कदाऽपि कस्यचित्

विदेशीयस्य वशे नावर्तन्त। तथा च तस्य स्वातन्त्र्यमसहमानोऽकबरो माणिक्यपुरस्य विषयाध्य क्षमा सिफखाँ नामानं गढमण्डलं विजेतुं प्राहिणोत्। तेन सह षट् सहस्त्राण्यश्वारोहा द्वादशसहस्त्राणि च पत्तय आसन्। तस्यावस्कन्दमाकर्व्य न स्वल्पमप्यकम्पत दुर्गावत्या हृदयम्। न खलु सा किंकर्तव्यतामूढाभवत्। किन्तु साऽपि द्वे सहस्त्रे हस्तिनोऽष्टौ सहस्त्राणि चाश्वारोहान् नीत्वा स्वराज्यरक्षार्थं स्वयं प्रातिष्ठत। वीरवेषधारिणी सा गजेन्द्र पृष्ठमधिरुरोह। तस्या अबलायाः कोमलमपि हृदयं वजवि निर्मितमिवाऽभासत। प्रस्थानकाले विविधान् वीरवादान् वदन्ती सा स्वसैन्यं नितान्तमुदसाहयत्। स्वयं युद्धधमाना स्वाँश्च योधयन्ती सा स्वबलेन तथा शत्रूनाक्रमयद्यथा घोर युद्धानन्तरमा- सिफखानस्य पञ्चशतान्यश्वारोहा धराशायिनोऽभवन्। अवशिष्टा च सेना क्षणादेव पलायत। दुर्गावती सुदूरं तामन्वसरत्, तां च तथा पीडयितुमैच्छद्यथा पीड्यमानाः सैनिकाः पुनर्गढमण्डलस्य नामाऽपि न गृह्णीयुः। परं महता कायक्लेशेन युद्धयमानास्तस्या अपि सैनिका अत्यन्तं श्रान्ता आसन्नतो नातः परमवस्कन्दं कर्तु मुदसहन्त। तथा च लब्धविजया सा।

प्रतापवती दुर्गावती सप्रमोदं पुरं प्रति न्यवर्तत। तादृशस्य महतो वीरस्याकबरस्योच्चाधिकारी स आसफखाँ तु तयाऽबलया पराजितो नितान्तमेवालज्जत। अत एव च भीतोऽपि पलायितोऽपि च स कथंचित्तां व्रीडामपनेतुमिच्छुः पुनर्युद्धसंभारान् बभार। पूर्वावस्कन्दावसरे चानधिगतपथिस्थितिः स तोपकानानयत्, परमस्मिन् समये तेऽपि तेन सहाऽवर्तन्त। तदागमन वृत्तान्तमुपलभ्य दुर्गावत्यपि प्रथमत एव कस्मिँश्चिन्निविड़े पार्वते पथि स्वसैन्यमवास्थापयत, परं यवनाः केनचिदपरेण पथा प्रविश्य तस्याः सेनामाक्राम्यन्। अस्मिन्नवसरे दुर्गावत्या एक- मात्रः पुत्रो वीरवल्लभः द्विवारं तथा यवनसेनामयोधयत् यथाऽत्यन्तं विक्षता सा पलायमानेवालक्ष्यत, परं तृतीयेऽवसरे स स्वयमेव भृशं विक्षतो बभूव। तस्य तां दशामवलोक्य प्राण- रक्षणेऽपि शङ्कमाना सा राज्ञी राजकुमारं शिविरमनयत्। अवसरं प्राप्यान्येऽपि बहवः कातरा रणक्षेत्रं जहुः।

तदानीं तत्र केवलं त्रीणि शतानि मनुष्या अतिष्ठन्। दुर्गावती तु तस्मिन्नतिविषमेऽपि समये स्वकर्तव्ये नामुह्यत्। न खलु तस्याः करौ क्षणमपि विश्रान्तिमलभताम्। सा निरन्तरं भुवं मुण्डमण्डली समलङ्कृतां चकार। अत्रान्तरे एकस्तीक्ष्णः शरस्तस्या नेत्रे प्रविवेश। दुर्गावती तं सहसैवोज्जहार। परमेको लोहकणस्तस्या नेत्रे एवातिष्ठत्। अक्ष्णो वाणमुद्धरन्त्या एव तस्याः कण्ठे कोऽप्यपरो वाणः संलग्नः। तथा चोत्साहसंपन्ना या अपि तस्याः शरीराद् बहलस्यरुधिरस्य प्रस्त्रतत्वान्नयनयोः पुरतस्तम इव विततमभवत्। तस्यास्तां दशामालोक्य पाश्वर्ती कश्चित्सामन्तः सविनयमवदत् "स्वामिनि। सांप्रतं भवत्याः शरीरं युद्धश्रमसहं नास्ति, तद्यदि स्वामिनी समादिशति तर्हि संस्कृतरत्राकरः।

यत्नाद् भवतीं शिविरमुपनयामि" इति तदाकर्ण्यं दुर्गावती प्राह "यद्यप्यस्मिन् समयेऽस्माकमेव पराजयोऽस्ति, तथाप्यद्य यावदस्माकं प्रतिष्ठाऽकलुषितैवास्ति। तथा च सन्निहितापायस्यास्य कायस्य कृते रणपरित्यागोंऽशतोऽपि मे न रोचते। अहं यदि तव स्वामिनी भवामि तर्हि ममेमामन्तिमामाज्ञां पालयितुं त्वरस्व। मम शिरः शीघ्रं शरीराद् वियोजय। कोष्ठात् खड्गमु दूघ गुर" इति। सामन्ताय तु तादृश्याः स्वामिन्या हननं नारोचत। ततश्च दुर्गावती तमनभिमतमभीक्ष्य शत्रुदलं च सर्वतो वेष्टयदवलोक्य पणपालनार्थिनी सा स्वयमेव वक्षसि च्छुरिकां प्रावे- शयत्। एवं मृताया अपि तस्याः शवं त्रायमाणाः शेषाः सैनिका अपि तत्रैव रणमरणमवापन्। प्रियपाठकाः ! अपि बुद्धं भवद्भिः स्त्रीणां शौर्यम्। अपि वश्चेतसि जातस्तोषः। साधु हृष्यन्तु भवन्तः। प्रयच्छन्तु तस्यै शुभाशिषः।

दुर्गावत्याः समाधिविषये स्तीमनसाहब एवं कथयति "अद्ययावदुर्गावत्याः समाधिस्थलं पर्वताभ्यन्तरे वर्तमानमस्ति। स च प्रदेशः स एवास्ति यत्र तन्महद्युद्धमभवत्। ये जनास्तस्माच्छून्यात् प्रदेशात् प्रसरन्ति ते तत्र बाहुल्येन लभ्यमानानि विल्लौरप्रस्तरशकलानि सादरं तस्याः समाधौ समर्पयन्ति। षोडशवर्षाण्यतिक्रान्तानि मम तत् स्थलं विलोकितवतः। यदाऽहं तदपश्यं तदा तस्या राश्या: कौशलं शीर्य च स्मृत्वा स्मृत्वा मम हृदयं गद्गदमभवत्। अन्ये यात्रिका इवाहमपि चैकं विल्लौरशकलं समप्ये रास्या: शौर्यादिगुणेषु संमानमदर्शयम्।" एवमियमधुना समाप्ता दुर्गावतीगाथा। सेयं वः श्रेयसेऽस्तु।

**यासां स्मरणवशादपि पापं क्षणतः क्षयं याति।**

**तासां चरितमिदं वः श्रेयः कुरुतात् सुबालानाम्॥**